**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2025 SHISRRJ | Volume 7 | Issue 6
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# कातीयचातुर्मास्ययागान्तर्गतं वैश्वदेवपर्वणः स्वरूपम्

डॉ. रणजीत कुमार
सह आचार्यः, संस्कृत-पालि एवं प्राकृत-विभागः, हिमाचलप्रदेश-केन्द्रीयविश्वविद्यालयः, धर्मशाला

**Article Info**

Accepted : 02 Dec 2024

Published : 20 Dec 2024

**Publication Issue :**

November-December-2024

Volume 7, Issue 6

**Page Number :** 126-133

**शोधसारः-** चातुर्मास्यप्रयोगप्रारम्भः फाल्गुन्यां भवति। चातुर्मास्यानां प्रथमं पर्व वैश्वदेवपर्व वर्तते। वैश्वदेवधर्माश्चातुर्मास्येषु वचनप्रवृत्तिभ्यामिति अर्थात् वैश्वदेवस्य धर्माः उत्तरेषु पर्वसु प्रवर्तन्ते। वैश्वदेवं अन्येषां वरुणप्रघास-साकमेध-शुनासीरीय-पर्वणां प्रकृतिः वर्तते। चातुर्मास्यारम्भे अन्वारम्भणीया इष्टिः अथवा वैश्वानरपार्जन्येष्टिः क्रियते ।वैश्वदेवे अष्टौ प्रधानदेवताः सन्ति। वैश्वदेवपर्वणि नव प्रयाजाः नव अनुयाजाश्च भवन्ति। वैश्वदेवपर्वणि प्रस्तरः कुशप्रस्वः भवति। वैश्वदेवपर्वणि समिष्टयजूंषि मन्त्रत्रयेण जुहुयाद्। प्रथमजो गौर्दक्षिणा। यजमानस्य गोष्ठे प्रथमं जातः प्रथमजः तादृशः गौः वैश्वदेवपर्वणः दक्षिणात्वेन देयः। अस्य पर्वणः प्रजाश्रीफलसाधनत्वं ब्राह्मणे उक्तम् । वैश्वदेवपर्वणिदर्शपूर्णमासविधयः अतिदिष्टाः। प्रकृतिवद् विकृतिः कर्त्तव्या इति। अतः अस्य यागस्य विशिष्टविधयः एव अत्र वर्ण्यन्ते। प्रधानयागस्य शतपथब्राह्मणे विहितं वर्णनं विशेषतया उक्त्वा तस्य सामाजिकपक्षः कथयिष्यते।

**कूटशब्दाः**-चातुर्मास्यम्, वैश्वदेवपर्व, अष्टौ प्रधानदेवताः, स्वतवसः मरुतः, प्रयाजाः, अनुयाजाः, कुशप्रस्वः, पयस्या, प्रजाः, सृष्टिः, पयोरूपमन्नम् ।

**प्रस्तावना -** चतुर्णां मासानां समाहारः चतुर्मासम् । चतुर्षु मासेषु क्रियते/सम्पाद्यते यत् कर्म तत् चातुर्मास्यम्। चतुर्मास शब्दात् "चतुर्मासाद्यज्ञे ण्योवक्तव्य" इति वार्तिकाद् ण्य-प्रत्ययेन -चातुर्मास्यम् इति सिद्ध्यति। चातुर्मास्यशब्दः कर्मणः नामधेयम्। वैश्वदेव-वरुणप्रघास-साकमेध-शुनासीरीय-संज्ञानि चत्वारि पर्वाणि चातुर्मास्यपदेन अभिधीयन्ते। अत्र कात्यायनश्रौतसूत्रानुसारं चातुर्मास्ययागान्तर्गतं वैश्वदेवपर्वणः स्वरूपं विचार्यते।

**Copyright © 2025 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

चातुर्मास्यप्रयोगप्रारम्भः फाल्गुन्यां भवति।[1] फाल्गुनीशब्देन च पौर्णमास्यभिधीयते। फाल्गुनी चैत्री वैशाख्याषाढीति च पौर्णमासीषु रूढाः शब्दाः।[2] चातुर्मास्यानां प्रथमं पर्व वैश्वदेवं वर्तते। वैश्वदेवधर्माश्चातुर्मास्येषु वचनप्रवृत्तिभ्यामिति[3] अर्थात् वैश्वदेवस्य धर्माः उत्तरेषु पर्वसु प्रवर्तन्ते। वैश्वदेवं अन्येषां वरुणप्रघास–साकमेध–शुनासीरीय–पर्वणां प्रकृतिः वर्तते, दर्शपौर्णमासस्य विकृतिश्च। वैश्वदेवस्य केचन प्रमुखविधयः अत्र उच्यन्ते। चातुर्मास्यारम्भे अन्वारम्भणीया इष्टिः अथवा वैश्वानरपार्जन्येष्टिः क्रियते ।वैश्वदेवं पर्व प्राचीनप्रवणे कर्त्तव्यम्

**वैश्वानरपार्जन्येष्टिः**[4] **-**

इयमिष्टिः चातुर्मास्याङ्भूता न चातुर्मास्यशब्दवाच्या। **वैश्वानरो द्वादशकपालश्चरुरुत्तरः** इति श्रौतसूत्रानुसारं वैश्वानराय द्वादशकपालहविः तथा च पर्जन्याय चरुहविः प्रदीयते । अन्ये सर्वे धर्माः पौर्णमासेष्टितः अतिदिश्यन्ते ।

वैश्वदेवं पर्व प्राचीनप्रवणे कर्त्तव्यम्। **प्राचीनप्रवणे**[5] अर्थात् पर्वस्थानं प्राचीं प्रति निम्नं स्यात्। दर्शपूर्णमासयागधर्मत्वेन समदेशप्राप्तौ अनेन सूत्रेण प्राचीनप्रवणविधानं कृतम्। पर्वण्यस्मिन् यजमानः यथाविधि अग्निमन्थनं करोति[6] ।।

**प्रयाजाः-** प्रधानयागात् पूर्वं क्रियमाणः यागः। यस्य स्वरूपं श्रौतसूत्रे शतपथब्राह्मणे च पौर्णमासप्रकरणे विस्तरेण उक्तम्। तत्र पञ्च प्रयाजाः त्रयोअनुयाजाः विहिताः, अत्र वैश्वदेवपर्वणि नव प्रयाजाः भवन्ति[7]। ताश्च नव देवताः सन्ति–

| **क्र. स.** | **देवता** | **हविःपदार्थः** |
|---|---|---|
| 1. | समिधः | आज्यम् |
| 2. | तनूनपात् | आज्यम् |
| 3. | इडः | आज्यम् |
| 4. | बर्हिः | आज्यम् |
| 5. | द्वारः | आज्यम् |
| 6. | उषासानक्ता | आज्यम् |
| 7. | दैव्यौ होतारौ | आज्यम् |
| 8. | तिस्रः देवीः | आज्यम् |
| 9. | स्वाहा | आज्यम् |

**प्रधानयागः**

वैश्वदेवे अष्टौ प्रधानदेवताः सन्ति। तासां पृथक् पृथक् हवींषि सन्ति। तत्र प्रथमं फलम् उक्तम्

**स यः प्रजाकाम एतेन हविषा यजते – आत्मानमेवैतद्यज्ञं विधत्ते-प्रजापतिं भूतम्**[8] **।।**

यः यजमानः प्रजाकामः सः एतेन वैश्वदेवाख्यपर्वरूपेण हविषा यजेत । वस्तुतः वैश्वदेवं कर्म प्रजोत्पत्तेः ताभ्यः अन्नव्यवस्थायाश्च सूचकं वर्तते । अतः तदेव ब्राह्मणेन कथ्यते –

**प्रजापतिर्ह वा इदमग्र एक एवास। स ऐक्षत– कथं नु प्रजायेयेति । सोऽश्राम्यत्, स तपोऽतप्यत, स प्रजाअसृजत**[9]

इत्यादिषु कण्डिकासु प्रजापतिद्वारा सृष्टाः प्रजाः क्रमशः उक्ताः। आचार्यः सायणः भाष्ये लिखति यत् –

त्रिवारं सृष्टाः प्रजाः पराभूताः। तासां पराभवकारणं किमिति विचार्य अनशनतया वै मे प्रजाः पराभवन्ति इति कारणं ददर्श। उत्पत्स्यमानानां प्रजानाम् अनशनत्वं मा भूदित्येतदर्थं प्रजापतिः अग्रिमसृष्टेः प्रागेव स्वशरीरस्य एव सम्बन्धिनोः स्तनयोः पयः पूरितवान् । एवमशनं प्रकल्प्य अनन्तरं याः प्रजाः सृष्टाः ताः प्रजाः पयसा पूर्णौ स्तनौ प्राप्य जीवनवत्यः अभवन्। ताः पराभवं न प्राप्ताः ।

प्रधानयागस्य अनुष्ठानं पौर्णमासवद्भवति । देवताद्रव्यनिर्देशः क्रियते ।

| **क्र.स.** | **देवता** | **हवींषि** |
|---|---|---|
| 1. | अग्निः[10] | अष्टकपालः पुरोडाशः |
| 2. | सोमः[11] | चरुः |
| 3. | सविता[12] | अष्टकपालः द्वादशकपालो वा पुरोडाशः |
| 4. | सरस्वती[13] | चरुः |
| 5. | पूषा[14] | पिष्टचरुः |
| 6. | स्वतवसः मरुतः[15] | सप्तकपालः पुरोडाशः |
| 7. | विश्वेदेवाः[16] | पयस्या |
| 8. | द्यावापृथिवी[17] | एककपालः पुरोडाशः |

शतपथब्राह्मणे हविर्विधानं हेतुसहितं वर्णितम्। तत्र –शतपथब्राह्मणात् प्रधानहविस्सम्बन्धीमूलकण्डिकाः सायणभाष्यसारं च क्रमशः उद्ध्रियते स्पष्टप्रतिपत्तये[18]।

**स वाऽआग्नेयोऽष्टकपालः पुरोडाशो भवति । अग्निर्वै देवतानां मुखं प्रजनयिता स प्रजापतिस्तस्मादाग्नेयो भवति ॥8॥**

तत्र प्रथमं हविः आग्नेयः[19] अष्टकपालः[20] पुरोडाशः भवति। देवानां मुखभूतः अग्निः 'प्रजनयिता' उत्पादयिता मातापितृभ्यां भुक्तस्यान्नस्य जाठराग्निपरिपाकवशेन शुक्रशोणितात्मना परिणामादग्नेः प्रजनयितृत्वम्; अत एव सोऽग्निः प्रजापतिरित्यर्थः ॥ 8 ॥

**अथ सौम्यश्चरुर्भवति । रेतो वै सोमस्तदग्नौ प्रजनयितरि सोमं रेतः सिञ्चति । तत्पुरस्तान्मिथुनं प्रजननम् ॥9॥**

द्वितीयं हविः सौम्यः[21] चरुः भवति। सोमो ह्यमृतमयत्वाद्रेतोरूपः। प्रजनयितरिउत्पादयितरि अग्नौसोमात्मकंरेतःसिञ्चतितदेव प्रजोत्पत्तिसाधनं पुरस्तात् क्रियमाणमेकं मिथुनंसम्पन्नं भवति ॥ 9॥

**अथ सावित्रो द्वादशकपालो वाऽष्टाकपालो वा पुरोडाशो भवति । सविता वै देवानां प्रसविता, प्रजापतिर्मध्यतः प्रजनयिता । तस्मात्सावित्रो भवति ॥ 10 ॥**

तृतीयं हविः सावित्रो[22] द्वादशकपालः भवति। प्रसविताप्रेरयिता। स एव 'प्रजापतिः' वैश्व–देवादिपर्वचतुष्टयसंचारिणामाग्नेयादीनां पञ्चानां यागानां मध्ये इज्यमानः सन् 'सविता' 'मध्यतः' एव प्रजानां 'प्रजनयिता' उत्पादयिता भवति ॥ 10 ॥

पर्वचतुष्ट्येऽपि पञ्च देवताः समानाः –1. अग्निः, 2. सोमः, 3. सविता, 4. सरस्वती, 5. पूषा इति। तत्र पञ्चसु तृतीया देवता सविता मध्यस्थानीयः संख्यादृष्ट्या । ब्राह्मणवचनस्य **'मध्यतः'** इति पदस्य तात्पर्यः।

**अथ सारस्वतश्चरुर्भवति। पौष्णश्चरुः। योषा वै सरस्वती, वृषा पूषा । तत्पुनर्मिथुनं प्रजननम् । एतस्माद्वाउभयतो मिथुनात्प्रजननात्प्रजापतिः प्रजाः ससृजे-इतश्चोर्ध्वा इतश्चावाचीः। तथो एवैष एतस्मादुभयत एव मिथुनात्प्रजननात्प्रजाः सृजते-इतश्चोर्ध्वा इतश्चावाचीः । तस्माद्वा एतानि पञ्च हवींषि भवन्ति ॥ 11 ॥**

चतुर्थं हविः सारस्वतः[23] चरुः भवति। पञ्चमं हविः पौष्णः चरुः भवति। आदावनुष्ठिताग्नेयसौम्यलक्षणात् मिथुनादन्ततः क्रिमाणमेतदन्यदित्यर्थः। प्रजननं तत्साधनं मिथुनम्। उभयत इति आद्यन्तयोः क्रियमाणादित्यर्थः। अस्मात् भूलोकादारभ्य उपरितनलोकवर्तिनीः प्रजाः अस्मादेव भूलोकाद् अवाचीनलोकवर्तिनीश्व प्रजाः उभयतः अवस्थितात् मिथुनात्प्रजापतिः सृष्टवानित्यर्थः। इदानीन्तनयजमानोऽपि एवमेव मिथुनद्वयानुष्ठानेन द्विविधाः प्रजाः सृजति ॥ 11 ॥

**अथातः पयस्याया एवायतनम् । मारुतस्तु सप्तकपालो विशो वै मरुतो देवविशस्ता हेदमनिषेद्ध्रा इव चेरुः। ताः प्रजापतिं यजमानमुपेत्योचुर्वि वै ते मथिष्यामहऽइमाः प्रजाःया एतेन हविषा स्त्रक्ष्यस इति ॥ 12॥**

षष्ठं हविः मारुतः सप्तकपालः भवति। वैश्यजातयो हि मरुतः ते च देवतारूपत्वाद् देवविशःखलु' अनिषेद्ध्रा इव' अनिषेधुकाः अर्थात्नियन्तृरहिता इव स्वतन्त्राः इदं 'चेरुः'। 'ताः' स्वातन्त्र्येण वर्त्तमानाः आद्यैः पञ्चभिर्हविर्भिः प्रजा उत्पादितवन्तं प्रजापतिंयजमानम्उपेत्यउप गत्य ऊचुः – त्वदीयाः इमाः उत्पन्नाः प्रजाः वयं विमथिष्यामहे–हिंसयिष्यामः याः प्रजाः एतेन वैश्वदेवपर्वात्मना हविषात्वं स्रक्ष्यसेसृष्टाः करिष्यसि ॥ 12 ॥

**स ऐक्षत प्रजापतिः। परा मे पूर्वाः प्रजा अभूवन्निमा उ चेदिमे विमथ्नतेन ततः किञ्चन परिशेक्ष्यत इति तेभ्य एतं भागमकल्पयदेतं मारुतं सप्तकपालं पुरोडाशम्। स एष मारुतः सप्तकपालः। तद्यत्सप्तकपालो भवति-सप्तसप्त हि मारुतो गणः। तस्मान्मारुतः सप्तकपालः पुरोडाशो भवति ॥ 13॥**

एवं मरुद्भिरुक्ते सति सः प्रजापतिः ऐक्षतपर्यालोचितवान्मेमदीयाः पूर्वाःपूर्वसृष्टाः प्रजाः पराभूवन्। इमाःअपि प्रजाः इमेमरुतः विमथ्नन्तेबाधन्ते चेत् ततःअनन्तरं किमपि सृष्टं न परिशेक्ष्यतेपरिशेषितं न भविष्यति। एवंमरुद्भ्यो भीतः सन्तेभ्यः एतंसप्तकपालरूपं भागंकल्पितवान् । अतः प्राप्तस्थानमपि पयस्यायागं परित्यज्य स एष मारुतः यागः इदानीमपि

षष्ठत्वेनानुष्ठीयते। मरुतो हि सप्तगणाः तेष्वेकैकस्मिन् गणेषु सप्तसप्त मरुतः, ते चैकोनपञ्चाशत्सङ्ख्याकाः सन्ति ॥ 13 ॥

**तं वै स्वतवोभ्य इति कुर्यात् । स्वयं हि त एतं भागमकुर्वतोतोस्वतवोभ्यो याज्यानुवाक्ये न विन्दन्ति । स उ खलु मारुत एव स्यात् । स वा एष प्रजाभ्य एवाहिंसायै क्रियते । तस्मान्मारुतः ॥ 14 ॥**

तेखलुसप्तकपालं पुरोडाशं स्वतवोभ्यः इतिविशेषणविशिष्टेभ्यो मरुद्भ्यः कुर्यात् । तवः इति बलनाम[24] स्वायत्तं तवो बलं येषां ते स्वतवसः। अस्य विशेषणस्यान्वर्थतामाह–तेमरुतः स्वयं हि स्वपौरुषेणैव हि एतं भागं स्वीकृतवन्तः, अतस्ते स्वतवसः संपन्ना इत्यर्थः। यदि तु स्वतवोभ्यःयाज्यानुवाक्ये नएव लभतेतदा सः एव प्रागुक्तः केवलः मारुत एवयागो भवति[25]। सः खलु एषःमारुतो यागः प्रजाभ्यःप्रजानाम्[26] अहिंसायैमरुत्कृतबाधाराहित्याय एवक्रियते इति मारुतयागस्य निगमनम् ॥ 14 ॥

**अथातः पयस्यैव । पयसो वै प्रजाः सम्भवन्ति-पयसः सम्भूताः तद्यत एव सम्भूता यतः सम्भवन्ति-तदेवाभ्य एतत्करोति । तद्याः पूर्वैर्हविर्भिः प्रजाः सृजते ता एतस्मात्पयस एतस्यै पयस्यायै सम्भवन्ति ॥ 15 ॥**

**तस्यां मिथुनमस्ति- योषा पयस्या, रेतो वाजिनम्। तस्मान्मिथुनाद्विश्वमसंमितमनु प्राजायत ।तद्यदेतस्मान्मिथुनाद्विश्वमसंमितमनु प्राजायत तस्माद्वैश्वदेवी भवति ॥16॥**

सप्तमं हविः वैश्वदेवी पयस्या भवति। दध्ना संस्कृतः पयोविकारः पयस्या, असौ च आमिक्षाशब्देन अन्यत्र आम्नायते। सृष्टयादौ प्रजापतिना सृज्यमानास्ताः प्रजाःतदीयस्तन्यरूपात् पयसःसकाशात् सम्भूताःप्रवर्द्धिताः, एवमिदानीमपि सर्वाः प्रजाः पयस एव सम्भवन्ति, जन्मानन्तरं तत्क्षणे एव पयोलक्षणमन्नं प्राप्य वर्द्धन्ते। तथा सतिएतेन पयस्यायागेन प्रजावृद्धिहेतुभूतं पयः आभ्यःप्रजाभ्यः सम्पादयति। अत एव इदानीं पूर्वसृष्टानां प्रजानाम् अभिवृद्धिर्दृश्यते। पूर्वैःप्रागुक्तैराग्नेयादिभिः पञ्चभिः हविर्भिः उत्पन्नाः प्रजा पयसा एव वर्द्धन्त इत्यर्थः ॥ 15 ॥

तस्यांपयस्यायां प्रजननसाधनं मिथुनंविद्यते पयस्याशब्दस्य स्त्रीलिङ्गत्वात् योषातदनुनिष्पादि वाजिनंरेतः पुंसो वीर्य्यम्। तस्मात् मिथुनात्असम्मितम्अपरिमितम् इदं विश्वंदेवमनुष्याद्यात्मकम्अनुप्राजायतअनुक्रमेण प्रजापतेःप्रजातमभूत्। यस्माद् विश्वोत्पत्तिहेतुः पयस्या, तस्माद् विश्वदेवदेवत्या कार्येत्यर्थः ॥ 16 ॥

**अथ द्यावापृथिव्य एककपालः पुरोडाशो भवति। एतैर्वै हविर्भिः प्रजापतिः प्रजाः सृष्ट्वा ता द्यावा-पृथिवीभ्यां पर्यगृह्णात्। ता इमा द्यावापृथिवीभ्यां परिगृहीताः। तथो एवैष एतद्या एतैर्हविर्भिः प्रजाः सृजतेता द्यावापृथिवीभ्यां परिगृह्णाति। तस्माद् द्यावापृथिव्य एककपालः पुरोडाशो भवति ॥ 17 ॥**

अष्टमं हविःद्यावापृथिव्यः एककपालः पुरोडाशो भवति। द्यावापृथिव्यौ देवते अस्येति द्यावापृथिव्यः[27]। प्रजापतिः एतैः हविर्भिः प्रजाः सृष्ट्वा द्यावापृथिवीभ्यां पर्यगृह्णाद् – अधस्तात् पृथिव्या, उपरिष्टाद् द्युलोकेन तदुभयलोकवर्तिनीः सृष्टाः प्रजाः 'पर्यगृह्णात्' परितो वेष्टितवान् । याश्व 'इमाः प्रजाः आभ्यां 'द्यावापृथिवीभ्यां'' परिगृहीताः' परिवेष्टिता एव वर्तन्ते, न पुनः स्वतो निगच्छन्ति ।यथा प्रजापतिः 'तथो' तथैव एषःइदानीन्तनो यजमानोऽपिएतैः हविर्भिः प्रजाः सृजते

सृष्ट्वा च पयस्यायागेन तासां पयोरूपमन्नं परिकल्प्यद्यावापृथिव्ययागेन द्यावापृथिवीभ्यांता: परिगृह्णातिपरिवेष्टयतीत्यर्थ:॥17॥

एवं वैश्वदेवपर्वणि अष्टौ प्रधानयागा विहिता:, दर्शपूर्ण–मासविधयस्तत्रातिदिष्टा:। प्रकृतिवद् विकृति: कर्त्तव्या इति।

**अनुयाजा:**

प्रधानयागानन्तरम् अनुयाजा: भवन्ति । वैश्वदेवपर्वणि नव अनुयाजा: भवन्ति ।

| **क्र. स.** | **देवता** | **हवि:पदार्थ:** |
|---|---|---|
| 1. | देवबर्हि: | आज्यम् |
| 2. | देवीर्द्वार: | आज्यम् |
| 3. | उषासानक्ता | आज्यम् |
| 4. | देवी जोष्ट्री | आज्यम् |
| 5. | ऊर्जाहुती | आज्यम् |
| 6. | दैव्या होतारा | आज्यम् |
| 7. | तिस्र: देवी: | आज्यम् |
| 8. | नराशंस: | आज्यम् |
| 9. | अग्नि: स्विष्टकृत: | आज्यम् |

वैश्वदेवपर्वणि प्रस्तर: कुशप्रस्व: भवति[28]। प्रसू: पुष्पम्। तद्वन्त: कुशा: कुशप्रस्व:– पुष्पिता: कुशा: इति यावत्। तानेव प्रस्तरं कुर्याद्[29]।

समिष्टयजु: – वैश्वदेवपर्वणि समिष्टयजूंषि मन्त्रत्रयेण जुहुयाद्[30] । अन्यानि कर्माणि दर्शपौर्णमासवद्भवन्ति ।

दक्षिणा–प्रथमजो गौर्दक्षिणा । यजमानस्य गोष्ठे प्रथमं जात: प्रथमज: तादृश: गौ: वैश्वदेवपर्वण: दक्षिणात्वेन देय:[31]। अस्य पर्वण: प्रजाश्रीफलसाधनत्वं ब्राह्मणे उक्तम्[32] ।

**निष्कर्ष: –** अयं याग: अस्मान् प्रजोत्पत्तिं तस्या: संरक्षणं पालनं च उपदिशति। सृष्ट्यर्थं उत्पादयिता आवश्यक: सश्च अग्नि:। प्रथमे यागे अग्नि: प्रजनयिता प्रजापतिश्च कथित:। सृष्ट्यर्थं रेत: आवश्यकम् अत: द्वितीययागदेवता सोम: रेतोरूप: उक्त:। अग्नौ प्रजनयितरि सोमं रेत: सिञ्चति इति। युग्मेन सृष्टि:। तृतीययागस्थदेवता सविता अपि प्रसविता, उत्पादयिता, प्रेरयिता उक्त:। चतुर्थपञ्चमयागाभ्यां मिथुनं/प्रजननमुक्तम्। चतुर्थस्य सरस्वती पञ्चमस्य च पूषा देवता। एतस्मादुभयत एव मिथुनात्प्रजननात्प्रजा: सृजते। जातप्रजाया: रक्षणम् आवश्यकम्। तत्सूचक: षष्ठ: याग:–परा मे पूर्वा: प्रजा अभूवन्निमा उ चेदिमे विमथ्नतेन तत: किञ्चन परिशेक्ष्यत इति तेभ्य एतं भागमकल्पयद् । स्वतवस: मरुत:

शक्तिमन्तः स्वतन्त्राः। ते मारकाः न भूत्वा रक्षकाः भवन्तु। तदर्थं यज्ञे तेषां भागः। अनियन्त्रिताशक्तिः अनिष्टं न कुर्याद् तदर्थं केनापि उपायेन नियन्त्रणम् अनिवार्यम् इति। सप्तमः यागः रक्षितसृष्टेः परं तस्याः पोषणमावश्यकमिति सूचयति। सृष्टयादौ प्रजापतिना सृज्यमानास्ताः प्रजाःतदीयस्तन्यरूपात् पयसःसकाशात् सम्भूताःप्रवर्द्धिताः, एवमिदानीमपि सर्वाः प्रजाः पयस एव सम्भवन्ति, जन्मानन्तरं तत्क्षणे एव पयोलक्षणमन्नं प्राप्य वर्द्धन्ते इति भाष्यकारः विमृशति। अष्टमं यागः आवासादिकं सूचयति। एतेन सर्वेण एव प्रजाश्रीफलप्राप्तिर्भवति ।चातुर्मास्ययागस्य प्रथमं वैश्वदेवपर्व विकसितसमाजस्य प्रथमसोपानं निरूपयति। तत्र सृष्टिः तस्याः रक्षणम्, पालनम्, (आवासः) आधारश्च। समग्रस्वरूपं तु पर्वचतुष्ट्येन स्पष्टं भवति ।

**इति शम्**

**सन्दर्भसूची**


1. “चातुर्मास्यप्रयोगः फाल्गुन्याम्”कात्यायनः, कात्यायनश्रौतसूत्रम्, 5.1.1, चौखम्बा संस्कृत प्रतिष्ठान, द्वितीय संस्करण –1990
2. तत्रैव 5.1.1 कर्कभाष्ये
3. तत्रैव 4.3.4
4. तत्रैव 5.1.2 वैश्वानरपार्जन्यौ निरुप्येच्छन्
5. तत्रैव 5.1.16
6. तत्रैव 5.1.21 आसाद्याग्निमन्थनम्
7. तत्रैव 5.2.7 नवप्रयाजं नवानुयाजम्
8. याज्ञवल्क्यः, श्रीमद्वाजसनेयिमाध्यन्दिन- शतपथ–ब्राह्मणम्, सायणाचार्यविरचित–वेदार्थ–प्रकाशाख्यभाष्यसमेतम् 2,5,1.7, नाग प्रकाशन, जवाहर नगर, दिल्ली
9. तत्रैव 2,5,1.1–2 कण्डिकाः
10. आग्नेयः, कात्यायनः, कात्यायनश्रौतसूत्रम्, 5.1.4, चौखम्बा संस्कृत प्रतिष्ठान, द्वितीय संस्करण –1990
11. तत्रैव– सौम्यश्चरुः5.1.4
12. तत्रैव– सावित्रो द्वादशकपालः अष्टाकपालो वा
13. तत्रैव– सारस्वतश्चरुः
14. तत्रैव– पौष्णश्चरुः
15. तत्रैव– मरुद्भ्यः स्वतवद्भ्यःसप्तकपालः5.1.11
16. तत्रैव– वैश्वदेवी पयस्या 5.1.13
17. तत्रैव– द्यावापृथिवीय एककपालः 5.1.14
18. शतपथ–ब्राह्मणम्2,5,1.8–17 कण्डिकाः

19. अग्निर्देवता अस्य, **सास्य देवता**(पा. सू. 4.2.23) इत्यर्थे **अग्नेर्ढक्** (पा. सू. 4.2.32) इति ढक् ।पाणिनीयः अष्टाध्यायीसूत्रपाठः, सम्पादकः श्री पुं ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा, सितम्बर 2006
20. अष्टसु कपालेषु संस्कृतः
21. सोमो देवता अस्य' सौम्यः ' " सोमाट्टयण् "- (पा. सू. 4। 2 । 29) इति ट्यण् । "
22. सविता देवता अस्य इति सावित्रः(पुरोडाशः)
23. सरस्वती देवता अस्य सारस्वतः (चरुः)
24. निघ. 2.9.1
25. मरुद्भ्यः स्वतवद्भ्यः सप्तकपालो, मारुतो वेति - का. श्रौ. सू. 5.1.12
26. षष्ठयर्थे चतुर्थीति वाच्यम् - पा. सू. 2. 3.62 वा. 1
27. द्यावापृथिवीशुनासीरमरुत्वत् - (पा. सू. 4.2.32) इति-सूत्रेण यत् ।
28. कुशप्रस्वः प्रस्तरः, उपसन्नद्धः (का.श्रौ.सू. - 5.2.20)
29. तत्रैव सूत्रभाष्ये श्रीविद्याधरशर्मणः सरला वृत्तिः
30. तत्रैव त्रीणि समिष्टयजूंषि जुहोति "देवा गातुविदो, यज्ञयज्ञ, मेषत" इति (5.2.9.)
31. शतपथ ब्रा. 2.5.1.21 (सायणभाष्यम्)
32. तत्रैव 2.5.1.22 (सायणभाष्यम्)

**सन्दर्भग्रन्थसूची**


1. श्रीमद्वाजसनेयिमाध्यन्दिन-शतपथ-ब्राह्मणम्, सायणाचार्यविरचित-वेदार्थ-प्रकाशाख्यभाष्यसमेतम्, नाग प्रकाशन, जवाहर नगर, दिल्ली
2. शतपथ-ब्राह्मणम् भाग 1 एवं 2, स्व. पण्डित गंगाप्रसाद उपाध्याय विरचितया "रत्नदीपिका" हिन्दी टीकायोपेतम्, सार्वदेशिक आर्य प्रतिनिधि सभा, रामलीला मैदान, नई दिल्ली-2, 1998
3. श्रीमन्महर्षिकात्यायनप्रणीतम्,कात्यायनश्रौतसूत्रम्, चौखम्बा संस्कृत प्रतिष्ठान, बंगलो रोड, जवाहर नगर, दिल्ली,द्वितीय संस्करण -1990
4. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सम्पादकः श्री पुं ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा, सितम्बर 2006
5. श्रौतयज्ञों का संक्षिप्त परिचय, म.म.पं. युधिष्ठिर मीमांसक, विजयपाल विद्यावारिधि, रामलाल कपूर ट्रस्ट, रेवली, मुरथल, सोनीपत (हरियाणा)
6. दर्शपौर्णमासपद्धतिः, पण्डित भीमसेन शर्मा, रामलाल कपूर ट्रस्ट, रेवली, मुरथल, सोनीपत (हरियाणा)